# ॥ वाल्मीकि रामायण॥

## ३ अरण्यकाण्ड

### अध्याय ४७

सीताया वचनं श्रुत्वा दशग्रीवः प्रतापवान् ।
हस्ते हस्तं समाहत्य चकार सुमहद्वपुः ॥१॥

स मैथिलीं पुनर्वाक्यं बभाषे च ततो भृशम् ।
नोन्मत्तया श्रुतौ मन्ये मम वीर्यपराक्रमौ ॥२॥

उद्वहेयं भुजाभ्यां तु मेदिनीमम्बरे स्थितः ।
आपिबेयं समुद्रं च मृत्युं हन्यां रणे स्थितः ॥३॥

अर्कं रुन्ध्यां शरैस्तीक्ष्णैर्विभिन्द्यां हि महीतलम् ।
कामरूपिणमुन्मत्ते पश्य मां कामदं पतिम् ॥४॥

एवमुक्तवतस्तस्य रावणस्य शिखिप्रभे ।
क्रुद्धस्य हरिपर्यन्ते रक्ते नेत्रे बभूवतुः ॥५॥

सद्यः सौम्यं परित्यज्य भिक्षुरूपं स रावणः ।
स्वं रूपं कालरूपाभं भेजे वैश्रवणानुजः ॥६॥

संरक्तनयनः श्रीमांस्तप्तकाञ्चनकुण्डलः ।
दशास्यः कार्मुकी बाणी बभूव क्षणदाचरः ॥७॥

स परिव्राजकच्छद्म महाकायो विहाय तत् ।
प्रतिपेदे स्वकं रूपं रावणो राक्षसाधिपः ॥८॥

संरक्तनयनः क्रोधाज्जीमूतनिचयप्रभः ।
रक्ताम्बरधरस्तस्थौ स्त्रीरत्नं प्रेक्ष्य मैथिलीम् ॥९॥

स तामसितकेशान्तां भास्करस्य प्रभाम् इव ।
वसनाभरणोपेतां मैथिलीं रावणोऽब्रवीत् ॥१०॥

त्रिषु लोकेषु विख्यातं यदि भर्तारमिच्छसि ।
मामाश्रय वरारोहे तवाहं सदृशः पतिः ॥११॥

मां भजस्व चिराय त्वमहं श्लाघ्यस्तव प्रियः ।
नैव चाहं क्व चिद्भद्रे करिष्ये तव विप्रियम् ।
त्यज्यतां मानुषो भावो मयि भावः प्रणीयताम् ॥१२॥

राज्याच्च्युतमसिद्धार्थं रामं परिमितायुषम् ।
कैर्गुणैरनुरक्तासि मूढे पण्डितमानिनि ॥१३॥

यः स्त्रिया वचनाद्राज्यं विहाय ससुहृज्जनम् ।
अस्मिन्व्यालानुचरिते वने वसति दुर्मतिः ॥१४॥

इत्युक्त्वा मैथिलीं वाक्यं प्रियार्हां प्रियवादिनीम् ।
जग्राह रावणः सीतां बुधः खे रोहिणीम् इव ॥१५॥

वामेन सीतां पद्माक्षीं मूर्धजेषु करेण सः ।
ऊर्वोस्तु दक्षिणेनैव परिजग्राह पाणिना ॥१६॥

तं दृष्ट्वा गिरिशृङ्गाभं तीक्ष्णदंष्ट्रं महाभुजम् ।
प्राद्रवन्मृत्युसङ्काशं भयार्ता वनदेवताः ॥१७॥

स च मायामयो दिव्यः खरयुक्तः खरस्वनः ।
प्रत्यदृश्यत हेमाङ्गो रावणस्य महारथः ॥१८॥

ततस्तां परुषैर्वाक्यैरभितर्ज्य महास्वनः ।
अङ्केनादाय वैदेहीं रथमारोपयत्तदा ॥१९॥

सा गृहीतातिचुक्रोश रावणेन यशस्विनी ।
रामेति सीता दुःखार्ता रामं दूरगतं वने ॥२०॥

तामकामां स कामार्तः पन्नगेन्द्रवधूम् इव ।
विवेष्टमानामादाय उत्पपाथाथ रावणः ॥२१॥

ततः सा राक्षसेन्द्रेण ह्रियमाणा विहायसा ।
भृशं चुक्रोश मत्तेव भ्रान्तचित्ता यथातुरा ॥२२॥

हा लक्ष्मण महाबाहो गुरुचित्तप्रसादक ।
ह्रियमाणां न जानीषे रक्षसा कामरूपिणा ॥२३॥

जीवितं सुखमर्थांश्च धर्महेतोः परित्यजन् ।
ह्रियमाणामधर्मेण मां राघव न पश्यसि ॥२४॥

ननु नामाविनीतानां विनेतासि परन्तप ।
कथमेवंविधं पापं न त्वं शाधि हि रावणम् ॥२५॥

ननु सद्योऽविनीतस्य दृश्यते कर्मणः फलम् ।

कालोऽप्यङ्गी भवत्यत्र सस्यानाम् इव पक्तये ॥ २६॥

स कर्म कृतवानेतत्कालोपहतचेतनः ।
जीवितान्तकरं घोरं रामाद्व्यसनमाप्नुहि ॥ २७॥

हन्तेदानीं सकामा तु कैकेयी बान्धवैः सह ।
ह्रियेयं धर्मकामस्य धर्मपत्नी यशस्विनः ॥ २८॥

आमन्त्रये जनस्थानं कर्णिकारांश्च पुष्पितान् ।
क्षिप्रं रामाय शंसध्वं सीतां हरति रावणः ॥ २९॥

माल्यवन्तं शिखरिणं वन्दे प्रस्रवणं गिरिम् ।
क्षिप्रं रामाय शंसध्वं सीतां हरति रावणः ॥ ३०॥

हंससारससङ्घुष्टां वन्दे गोदावरीं नदीम् ।
क्षिप्रं रामाय शंसध्वं सीतां हरति रावणः ॥ ३१॥

दैवतानि च यान्त्यस्मिन्वने विविधपादपे ।
नमस्करोम्यहं तेभ्यो भर्तुः शंसत मां हृताम् ॥ ३२॥

यानि कानि चिदप्यत्र सत्त्वानि निवसन्त्युत ।
सर्वाणि शरणं यामि मृगपक्षिगणानपि ॥ ३३॥

ह्रियमाणां प्रियां भर्तुः प्राणेभ्योऽपि गरीयसीम् ।
विवशापहृता सीता रावणेनेति शंसत ॥ ३४॥

विदित्वा मां महाबाहुरमुत्रापि महाबलः ।
आनेष्यति पराक्रम्य वैवस्वतहृताम् अपि ॥ ३५॥

रामाय तु यथातत्त्वं जटायो हरणं मम ।
लक्ष्मणाय च तत्सर्वमाख्यातव्यमशेषतः ॥ ३६॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com